दिनाङ्क:- 30.05.2024

प्रात:- 06:55

**इयम् आकाशवाणी**

**सम्प्रति वार्ता: श्रूयन्ताम्**

**प्रवाचिका – निधितिवारी**

## अथवार्ता:

### प्रचाराभियानम्

लोकसभा-निर्वाचनस्य अन्तिमचरणस्य प्रचारस्य अद्य अन्तिमं दिनमस्ति। एतस्मिन् चरणे शनिवासरे मतदानं सप्तराज्यानां केन्द्रशासितप्रदेशस्य चण्डीग ढस्य च सप्तपञ्चाशदासेनभ्य: समनुष्ठीयते। अपि च एतस्मिन् क्रमे ओडिशाराज्ये द्विचत्वारिंशत्- विधानसभासनेभ्य: मतदानं भविष्यति। आकाशवाण्या: वार्ताहर: संसूचितवान् यत् रक्षामन्त्री भाजपेतिदलस्य च वरिष्ठनेता राजनाथसिंह: कुशीनगर-राबट्र्सगंज-चन्दौली-संसदीयक्षेत्रेभ्य: प्रचारं विधास्यति। मध्यप्रदेशस्य मुख्यमन्त्री मोहनयादव: कुशीनगर-सोनभद्र-क्षेत्रयो: मार्गीय-प्रदर्शनानि तत्रैव समाजवादी पार्टीतिप्रमुख: अखिलेशयादव: महाराजगंज-घोसी-लोकसभा-क्षेत्रयो: जनसमागमान् सम्बोधयिष्यति। झारखण्डराज्ये विविध-राजनीतिक-दलानां नेतारा: निजप्रत्याशिनां समर्थने मतदातृन् आक्रष्टुं सर्वविधप्रयासान् समाचरन्ति। वरिष्ठकांग्रेसदलीयनेता राहुलगांधी दुमकाक्षेत्रे नैर्वाचनिक-प्रचाराय तत्परो वर्तते। झारखण्डे भाजपेतिदलप्रमुख: बाबूलाल-मराण्डी गोड्डा-साहिबगंज क्षेत्रयो: नैर्वाचनिक-प्रचाराभियानानि करिष्यति। मुख्यमन्त्री चम्पई-सोरेन: अपि गोड्डा-दुमका-साहिबगंज-क्षेत्रेषु दल-प्रत्याशिनां समर्थने जनसभानां नैका: श्रृङ्खला: सम्बोधयिष्यति।

### भारत-बांग्लादेश:

भारत-बांग्लादेशयो: वाणिज्यदूत-वार्ताया: चतुर्थचरणं ह्य: नवदिल्ल्याम् समायोजितम्। संयुक्तसचिव: डॉ. अमनपुरी अत्रावसरे भारतीय-प्रतिनिधिमण्डलस्य नेतृत्वं कृतवान्। तत्रैव बांग्लादेशस्य पक्षत: प्रतिनिधिमण्डलस्य नेतृत्वं दक्षिणैशिया- महानिदेशक: विदेशमंत्रालस्य रोकेबुलहक: विहितवान्। उभौ पक्षौ वाणिज्यदूतसम्बद्ध-

पारगमनानुमतिपत्र-प्रत्यावर्तनादिषु विषयेषु पारस्परिक-समन्वयनं सहयोगं च दृढीकर्तुं व्यापकीं चर्चां समनुष्ठितवन्तौ। एतौ पक्षौ नागरिकाणां आवागमनसौविध्यं सरलीकर्तुं द्विपक्षीय-संशोधित-यात्रा व्यवस्थां इतोऽअपि सबलीकर्तुं सहमतौ जातवन्तौ।

## डी.आर.डी.ओ. रूद्र

रक्षानुसन्धान-विकाससंघटनेन ह्य: ओडिसायां भारतीय-वायु-सेनाया: एस्.यू.त्रिशंत् एम्.के.प्रथमं इत्यस्मात् स्थानकात् वायुत: भूपृष्ठं प्रति प्रहारकस्य रूद्र एम्. द्वितीयं प्रक्षेपास्त्रस्य सफलपरीक्षणं कृतम्। स्वदेशे निर्मिते एतस्मिन् प्रक्षेपास्त्रे अनेका: अत्याधुनिक-प्रौद्योगिक्य: समाविष्टा: विद्यन्ते। रक्षामन्त्री राजनाथसिंह: रूद्र.एम्.द्वितीयं इत्यस्य सफलपरीक्षणे वायुसेना-रक्षाउद्योगेभ्य: शुभकामना: प्रदत्तवान्।

## मुष्टामुष्टि-विश्वप्रतिस्पर्धा

थाई लैण्डदेशस्य बैंकाकनगरे समायोज्यमाणे द्वितीये मुष्टामुष्टि-विश्व-ओलम्पिक- प्रवेशचक्रके द्वन्द्वे भारतस्य अंकुशिताबोरो इत्येषा षष्टि: किलोग्रामभारमितवर्गस्य प्रागुपान्त्यचक्रं सम्प्राप्तवती। पुरुषवर्गेऽपि निशान्तदेव: एकसप्तति किलोग्राम-मितभारवर्गे प्रागुपान्त्यचक्रे निजस्थानं सुनिश्चितवान्।

## ऋतुविज्ञानविभाग:

ऋतु-विज्ञान-विभागेन पश्चिमोत्तर-मध्य-भारते च प्रवर्तमाने भीषणातपे अद्य आरभ्य शनैः शनैः न्यूनतायाः अनुमानः प्रकटितः। भीषणातपस्य स्थितिः अद्य यावत् जम्मू-हिमाचलप्रदेश-पंजाब-हरियाणा-चण्डीगढ-दिल्ली-उत्तरप्रदेश-मध्यप्रदेश-छत्तीसगढ-बिहार-ओडिशा राज्येषु एवमेव प्रवर्तिस्यते।

**।। इति वार्ता:।।**